# " श्रीसद्गुरुपादस्तवं "

श्रीशमंचितमव्ययं परमप्रकाशमगोचरं, भेदवर्जितमप्रमेयम नन्तमाद्यमकल्मषम्।
निर्मलं निगमान्तमद्वयमप्रतर्क्यमबोधकं, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 1।।

नादबिन्दुकलात्मकं दशनादभेदविनोदकं, मन्त्रराजविराजितं निजमण्डलान्तर्विशोभितं।
पंचवर्णमखण्डमद्भुतमादिकारणमच्युतम्, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 2।।

व्योमवद्बहिरन्तरस्थितमक्षरं निखिलात्मकं, केवलं परिशुद्धमेकमजन्म हि प्रतिरूपकम्।
ब्रह्मतत्त्वविनिश्चयं निरतानुमोक्षसुबोधकम्, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 3।।

बुद्धिरूपमबुद्धिकं त्रितयैककोटिनिवासिनम्, निश्चलं निरतप्रकाशनिर्मलं निजमूलकम्।
पश्चिमान्तरखेलनं निजशुद्धसम्यमिगोचरं, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 4।।

हृद्गतं विमलं मनोघ्नविभाषितं परमाणुकं, नीलमध्यसुनीलसन्निभमादिबिन्दुनिजांसुखम्।
सूक्ष्मकर्णिकमध्यमस्थितविद्युदादिविभाषितं, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 5।।

पंचपंचहृषीकदेह मनश्चतुष्कपरस्परम्, पंचभूतसकामषट्कसमीरशब्दमुखेतरं।
पंचकोशगुणत्रयादिसमस्तधर्मविलक्षणं, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 6।।

पंचमुद्रसुलक्षदर्शन भावमात्रनिरूपणं, विद्युदादिदधद्धगिद् रुचिरविनोदविवर्तनं।
चिन्मुखान्तरवर्तिनं विलसद्विलासममायकं, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 7।।

पंचवर्णसुचिर्विचित्र विशुद्धतत्त्वविचारणं, चन्द्रसूर्यचिदग्निमण्डलमण्डितं घनचिन्मयं।
चित्कलापरिपूर्णमन्तरचित्समाधिकनरीक्षणं, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 8।।

हंसचारमखण्डनादमनेकवर्णमरूपकम्, शब्दजालमयम्चराचरजन्तुदेहनिवासिनं।
चक्रराजमनाहतोद्भवमेघवर्णमतः परम्, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 9।।

जन्मकर्मविलीनकारण हेतुभूतमभूतकं, जन्मकर्मनिवारकं रुचिपूरकं भवतारकं।
नामरूपविवर्जितं निजनायकं शुभदायकं, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 10।।

तप्तकांचनदीप्यमान महाणुमात्रमरूपकं, चन्द्रिकान्तरतारकैरेवमुज्ज्वलं परमास्पदं।
नीलनीरदमध्यमस्थितविद्युदादिविभाषितं, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 11।।

स्थूलसूक्ष्मसकारणात्तरखेलनं परिपालनं, विश्वतैजसप्राज्ञचेतसमन्तरात्मनिजांसुखं।
सर्वकारणमीश्वरं नटरान्तरालविहारकं, प्रातरेव हि मानसन्तर्भावये गुरुपादुकां।। 12।।

।। श्रीमद्जगद्गुर्वाद्यशंकराचार्यविरचितं श्रीसद्गुरुपादस्तवं।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM